श्री चंद्रमौळीश स्तोत्रं

श्री चंद्रमौळीश स्तोत्रं

ओंकारजपरतानामोंकारार्थं मुदा विवृण्वानं |
ओजःप्रदं नतेभ्यस्तमहं प्रणमामि चंद्रमौळीशं || 1 ||

नम्रसुरासुरनिकरं नलिनाहंकारहारिपदयुगलं |
नमदिष्टदानधीरं सततं प्रणमामि चंद्रमौळीशं || 2 ||

मननाद्यत्पदयोः खलु महतीं सिद्धिं जवात्प्रपद्यंते |
मंदेतरलक्ष्मीप्रदमनिशं प्रणमामि चंद्रमौळीशं || 3 ||

शितिकंठमिंदुदिनकरशुचिलोचनमंबुजाक्षविधिसेव्यं |
नतमतिदानधुरीणं सततं प्रणमामि चंद्रमौळीशं || 4 ||

वाचो विनिवर्तंते यस्मादप्राप्य सह हृदैवेति |
गीयंते श्रुतिततिभिस्तमहं प्रणमामि चंद्रमौळीशं || 5 ||

यच्छंति यत्पदांबुजभक्ताः कुतुकात्स्वभक्तेभ्यः |
सर्वानपि पुरुषार्थांस्तमहं प्रणमामि चंद्रमौळीशं || 6 ||

पंचाक्षरमनुवर्णैरादौ क्लुप्तां स्तुतिं पठन्नेनां |
प्राप्य दृढां शिवभक्तिं भुक्त्वा भोगाँल्लभेत मुक्तिमपि || 7 ||

इति श्रीसच्चिदानंद शिवाभिनव नृसिंहभारती स्वामिभिः विरचितं श्री चंद्रमौलीश स्तोत्रं ||